यूपकटकः, पुं, ( यूपस्य कटक इव । ) यज्ञसमाप्ति-सूचकं पशुबन्धार्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्दंष्ट्रकाकृतिर्वा यः काष्ठविकारः सः । यूपमूले निहितलौहवलय इति केचित् । इति भरतः ॥ तत्पर्य्यायः । चषालः २ । इत्यमरः ।२।७।१८॥

यूपकर्णः, पुं, ( यूपस्य कर्ण इव । ) यूपैकदेशः । तत्पर्य्यायः । घृतावनिः २ । इति हेमचन्द्रः । ३ । ४८९ ॥

यूपद्रुः, पुं, ( यूपाय द्रुः । ) खदिरवृक्षः । इति त्रिकाण्डशेषः ॥

यूपद्रुमः, पुं, ( यूपाय द्रुमः । ) खदिरवृक्षः । इति शब्दरत्नावली ॥ रक्तखदिरः । इति राजनिर्घण्टः ॥

यूपलक्ष्यः पुं, ( यूपो लक्ष्य उपवेशनार्थमस्य । ) पक्षी । इति शब्दमाला ॥

यूपाग्रं, क्ली, ( यूपस्याग्रम् । ) यूपस्याग्रभागः । तत्पर्य्यायः । तर्म्म २ । इत्यमरः । २ । ७ । १९ ॥

यूष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) षष्ठस्वरी । यूषति । इति दुर्गादासः ॥

यूषं, पुं, क्ली, ( यूष् + कः । ) मुद्गादिकाथरसः । इत्यमरः । ३ । ५ । ३५ ॥ यूषोऽन्तःस्थादिः । चवर्गादिश्चेति मुकुटः । इति भरतः ॥ * ॥
अथ मुद्गयूषगुणाः ।
"मुद्गयूषोऽमिदो हृद्यः शुद्धानां व्रणिनामपि ।
पथ्यो बलाशपित्तघ्नो ज्वरहा च कृताकृतः ॥
असैन्धवलवणं सर्व्वमकृतं कटुकैर्विना ।
विज्ञेयं लवणस्नेहकटुकैः संस्कृतं कृतम् ॥
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ।
रुचिकृल्लघुपाकश्च दोषाणामविरोधकृत् ॥"*॥
मकुष्ठयूषगुणाः ।
"मकुष्ठयूषः संग्राही रूक्षो स्वादुः प्रमेहजित् ।
पित्तश्लेष्मज्वरहरस्तथातीसारनाशनः ॥"*॥
कुलत्थयूषगुणाः ।
"कुलत्थयूषोऽनिलहा शर्कराश्मरिनाशनः ।
तूणीप्रतूणीकासार्शोगुल्ममेदःकफापहः ॥"*॥
अनेन सह माषयूषगुणाः ।
"असमाषो गुरुर्भेदी वातघ्नो दीपनो मतः ॥"
अथ खड़यूषः ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वं खड़यूषोऽयमयं काम्बलिकोऽपरः ॥"*॥
खड़काम्बलिकयूषगुणाः ।
"दध्यम्लो लवणस्नेहतिलमाषविपाचितः ।
खड़काम्बलिकौ यूषौ ग्राहिवातकफापहौ ॥"
इति राजवल्लभः ॥ * ॥
अपि च । अथ यूषस्य विधिर्गुणाश्च ।
"अष्टादशगुणे नीरे शमीधान्यकृतो रसः ।
विरलान्नो घनः किञ्चित् पेयातो यूष उच्यते ।
उक्तः स एव निर्यूहो रुचिकृच्च विशेषतः ॥"
यूषस्य प्रकारान्तरमाह ।
"कल्कद्वयपलं शुण्ठीं पिप्पलीचार्द्धकार्षिकीम् ।
वारिप्रस्थेन विपचेत्तद्भवो यूष उच्यते ॥"
अयमर्थः । यूषान्नं पलमितं तत् कल्कीकृतं शुण्ठी पिप्पली च समुदितार्द्धकर्षमिता कल्कीकृता उभयमपि प्रस्थमितेन वारिणा पचेत् । तद्भवो यूषः ।
"यूषो बल्यो लघुः पाके रुच्यः कण्ठ्यः कफापहः ।"
अथ मुद्गयूषविधिः । वृन्दटीकायां तन्त्रान्तरे ।
"मुद्गानां द्विपलं तोये कृतमष्टाढ़कोन्मिते ।
पादस्थं मर्द्दितं पूतं दाड़िमस्य फलेन तत् ॥
युक्तं सैन्धवविश्वाह्वधान्यकैः पादकार्षिकैः ।
कणाजीरकयोश्चूर्णाच्छाणैकेनावचूर्णितम् ।
संस्कृतो मुद्गयूषोऽयं पित्तश्लेष्महरो मतः ॥"*॥
अथ मुद्गयूषगुणाः ।
"मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः ।
व्रणोर्द्ध्वगुरुदाहकफपित्तज्वरास्रहृत् ॥"*॥
अथ मुद्गामलकयूषगुणाः ।
"मुद्गामलकयूषस्तु भेदी पित्तानिलापहः ।
तृड्दाहशमनः शीतो मूर्च्छाश्रममदापहः ॥"
मकुष्ठयूषगुणाः पूर्व्ववत् । इति भावप्रकाशः ॥
( तथा च ।
"कुलत्थयूषो मधुरः कषायः
कफं सपित्तं विनिहन्ति शीघ्रम् ।
मेहाश्मरी पायुजमेदहन्ता
सन्दीपनो मूत्रविशोधनश्च ॥
आढ़कयूषं मधुरञ्च शीतं
विशेषतो वातनिवारणञ्च ।
श्लेष्मापहं पित्तहरं नराणां
कृमिं निहन्यादपि दारुणञ्च ॥
शीतलं मधुरं मौद्गं यूषं पित्तविकारजित् ।
वातदोषहरं प्रोक्तं ज्वराणां शमनं परम् ॥
मासूरो ग्राहको यूषो रूक्षो स्वादुः प्रमेहजित् ।
पित्तश्लेष्मज्वरघ्नः स्यात्तथातीसारनाशनः ॥
कषायं कटुकञ्चोष्णं वातघ्नं पुंस्त्वदोषकृत् ।
रक्तपित्तं निहन्त्याशु चणानां यूषमुच्यते ॥
घनं सवातं कफशुक्रमाषयूषं स पित्तकृत् ।
अम्लं पर्य्युषितं तच्च शस्यते तैलपाचने ॥
अन्यानि चैव शस्तानि कौलत्थान्युषितानि च ।
मसूराश्चिपुटा वल्याः कलायाद्याश्च सार्व्वताः ॥"
इति यूषविधिः ॥ * ॥
इति हारिते प्रथमस्थाने नवमेऽध्याये ॥
"ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः ।
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः ॥"
"पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ ।
पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ ।
श्वासकासप्रतिश्याय प्रसेकारोचकज्वरान् ।
हन्ति मूलकयूषस्तु कफमेदोगलामयान् ॥
कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः ।
तूणी प्रतूणी कासार्शोगुल्मोदावर्त्तनाशनः ॥
दाड़िमामलकैर्यूषो हृद्यः संशमनो लघुः ।
प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् ॥
मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः ।
यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥ )

यूषः, पुं, (यूषतीति । यूष् + कः ।) ब्रह्मदारुवृक्षः । इति शब्दरत्नावली ॥

येष, ऋ ङ यत्ने । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) अन्तःस्थादिः । ऋ, अयियेषत् । ङ, येषते यियेषे । इति दुर्गादासः ॥

योक्ता, [ ऋ ] त्रि, योगकर्त्ता । इति युजधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नम् ॥ ( यथा, वाजसनेयसंहितायाम् । ३० । १४ ।
"मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारᳬं शोकायाभिसर्त्तारम् ॥"
"योक्तारं योगकर्त्तारम् ।" इति तद्भाष्यम् ॥)

योक्त्रं, क्ली, ( युज्यतेऽनेनेति । युज् + "दाम्नीशसयुयुजस्तुतुदेति ।" ३ । २ । १८२ । इति ष्ट्रन् । ) युगेन सह वृषादय आबध्यते अनेन तत् । योत् दड़ि इति भाषा । तत्पर्य्यायः । आबन्धः २ योत्रम् ३ । इत्यमरः । २ । ९ । १३ ॥ ( यथा, ऋग्वेदे । ५ । ३३ । २ ।
"स त्वं न इन्द्र धियसानो अर्कैर्हरीणां वृषन् योक्त्रमश्रेः ॥"
"योक्त्रं नियोजनरज्जुं अश्रः आश्रयसि ।" इति तद्भाष्ये सायणः ॥ मन्थनरज्जुः । यथा, रामायणे । १ । ४५ । १८ ।
"ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम् ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥")

योगः, पुं, (युज समाधौ + भावादौ यथायथं घञ् ।) सन्नहनः । उपायः । ध्यानम् । सङ्गतिः । युक्तिः । इत्यमरः । ३ । ३ । २२ ॥ ( प्रेम । यथा, देवीभागवते । ३ । १५ । १३ ।
"स्त्रीयान् गुणान् प्रविततान् प्रवदंस्तदासौ तां प्रेमदामनुचकार च योगयुक्तः ॥"
"योगयुक्तः प्रेमयुक्तः ।" इति तट्टीकायां नीलकण्ठः ॥ छलम् । इति मनुः । ८ । १९५ ॥ अस्य प्रमाणं योगदानशब्दे द्रष्टव्यम् ॥ ) अपूर्व्वार्थसम्प्राप्तिः । वपुःस्थैर्य्यम् । प्रयोगः । विष्कम्भादिः । भेषजम् । विश्रब्धघातकः । द्रव्यम् । कार्म्मणम् । इति मेदिनी ॥ नैयायिकः । धनम् । इति हेमचन्द्रः ॥ चारः । सूत्रम् । इति त्रिकाण्डशेषः ॥ * ॥ ( येन वाक्यं युज्यते स योगः । यथा,—
"तैलं पिबेच्चामृतवल्लिनिम्बहिंस्राभयावृक्षकपिप्पलीभिः ।
सिद्धं बलाभ्याञ्च सदेवदारु
हिताय नित्यं गलगण्डरोगी ॥
सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः ।" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम् ॥ ) अथ सप्तविंशतियोगानां नामानि । यथा,—